दूताख्ययोरमात्यगुणैः समैः पादार्द्धवर्जितैः ।
विज्ञप्त्यर्थं कार्य्यवशात् शासनं न करोति यः ॥
मितार्थः कार्य्यमात्रोक्तौ न कुर्य्यादुत्तरोत्तरम् ।
यथोक्तवादी सन्देशहारको लेखहारकः ॥
तत्र दूतो व्रजन्नेव चिन्तयेदुत्तरोत्तरम् ।
वार्त्ताविशेषं भूपाय झटिति व्यङ्गवेश्मनि ॥
दूतो हि न लिखेत् किञ्चित् निर्गता विनि-
संशयम् ।
पृच्छ्यमानोऽपि न ब्रूयात् स्वामिनः क्वापि
वेशसम् ॥”
इति युक्तिकल्पतरुः ॥ * ॥

अथ दूते वर्णनीयानि । निजप्रभुतेजःश्रीविक्रमौ-न्नत्यकरवाक्यम् १ शत्रुक्षोभकरचेष्टा २ अधर्षणीयता ३ दक्षता ४ निर्भयत्वम् ५ । इति कविकल्पलता ॥ ( वैद्यकोक्तदूतो यथा,—
“आतुरोपक्रमार्थन्तु दूतो याति भिषग्गृहे ।
तस्य परीक्षणं कार्य्यं येन संलक्ष्यते गदः ॥
खञ्जान्धमूकं बधिरञ्च वामनं
क्लिबञ्च कुब्जं त्वरितञ्च जीर्णम् ।
श्रान्तं क्षुधार्त्तं भ्रमितञ्च दीनं
शस्तं न वै वेदविदो वदन्ति ॥”
“यः कर्कशः क्रोधनपाशपाणि-
र्भिषग्विगर्हीकृतशौचतञ्च ।
एते न शस्ताः प्रवदन्ति धीरा
दूता विकारं प्रतिवर्द्धयन्ति ॥
यः काष्ठहस्तोद्धतपाशपाणि-
स्तथातुरो दीनवचाहि रोदितः ।
प्रक्लिन्ननेत्रोगमनोत्सुकोऽपि
वर्ज्ज्या रुजार्त्तोऽशुभकारिदूतः ॥”
“नकुटहस्तोऽवष्टभ्य वक्रपादेन तिष्ठति ।
तस्मादाकुण्ठवादी यो न शस्तो वैद्यकर्म्मणि ॥
यथा गच्छति शीघ्रेण आविश्योत्थाय सत्वरि ।
पादौ प्रसार्य्य विशति मस्तके विन्यसेत् करम् ॥
भिनत्ति लोष्ट्रकाष्ठञ्च तृणं स्फोटयते क्वचित् ।
अथवा स्पृशते नाशां स्तनं वा स्पृशते पुनः ॥
भूमिं लिखति पादेन रेखां वापि करोति यः ।
निद्रां वा कुरुते यस्तु स दूतोऽरिष्टकारकः ॥
यः श्वेतवस्त्रावृतपूर्णपाणिः
सम्पूगताम्बूलमुखः प्रशस्तः ।
द्विजस्तथा माणवकः सुशील:
प्रज्ञाधिकश्चाङ्कयते सुखाय ॥”
“आगत्यादौच्चपूर्व्वामथ वरुणदिशमैशमाश्रित्य
शान्तो
दृष्ट्वा वैद्यं प्रहस्य प्रवदति निपुणं नातिनीचं
न चोच्चम् ।
उत्तिष्ठेति प्रमादं कुरु वचनमिदं सौख्यवार्त्तां
तनोति
याद्यैः स्वार्थं प्रकृष्टं सुखमगदहरं रोगिणां
वैद्यलाभम् ॥
पूर्व्वां दिशं समासाद्य प्रशान्तः शान्तया गिरा ।
वदन्ति वैद्यलाभाय रोगिणाञ्च सुखावहम् ॥
यथागत्योपविष्टोऽपि श्लोकं वाथ सुभाषितम् ।
वदते शान्तया वाचा वैद्यलाभञ्च शान्तये ॥
योऽभिवाद्यापि वैद्यस्य क्षेमं संपृच्छते पुनः ।
फलं ददाति पुष्पं वा रोगिणाञ्च सुखावहम् ॥
तस्य सौख्यं रुजां शान्तिर्यस्य दूता इदं विदुः ।
किमत्र बहुनोक्तेन रम्यो दूतः सुखावहः ॥”
इति हारीते द्वितीयस्थाने षष्ठेऽध्याये ॥)

दूतघ्नी, स्त्री, ( दु उपतापे + भावे औणादिकक्तः दीर्घश्च । दूतं उपतापं हन्तीति । हन + टक् । ङीप् । ) कदम्बपुष्पी । इति शब्दचन्द्रिका ॥

दूतिः, स्त्री, ( दूयते नायकादिवार्त्ताहरणादिनेति । दु + बाहुलकात् तिः दीर्घश्च । इत्युज्ज्वलदत्तः । ४।१७६ । ) दूती । इति शब्दरत्नावली ॥ ( यथा, रघुः । १८ । ५३ ।
“प्रतिकृतिरचनाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतररूपाः शुद्धसन्तानकामैः ॥” )

दूतिका, स्त्री, (दूतिरेव । स्वार्थे कन् । ततष्टाप् ।) दूती । इति शब्दरत्नावली ॥ ( यथा, पञ्चतन्त्रे । १ । १७८ ।
“जम्बुको हुडुयुद्धेन वयं चाषाढ़भूतिना ।
दूतिका परकार्य्येण त्रयो दोषाः स्वयं कृताः ॥”)

दूती, स्त्री, ( दूतिः । कृदिकारादिति वा ङीष् । ) सारिका । इति राजनिर्घण्टः ॥ दौत्यकर्म्मणि-नियुक्ता स्त्री । स्त्रीपुंसोः सन्देशप्रापिका । तत्पर्य्यायः । सञ्चारिका २ । इत्यमरः । २ । ६ । १७ ॥ दूतिः ३ दूतीका ४ दूतिका ५ । इति शब्दरत्नावली ॥ (यथा, आर्य्यासप्तशत्याम् ।२८० ।
“दयितप्रहितां दूतीमालम्ब्य करेण तमसि
गच्छन्ती ।
स्वेदच्युतमृगनाभिर्दूराद्गौराङ्गि ! दृश्यासि ॥”)
दौत्यव्यापारपारङ्गमा । तस्याः संघट्टनविरह-निवेदनादीनि कर्म्माणि । इति रसमञ्जरी ॥ ( तद्भेदगुणा यथा, साहित्यदर्पणे । ३ । १२६-१२७ ।
“दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ।
बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं
तथा ॥
कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ।
माधुर्य्यं नर्म्मविज्ञानं वाग्मिता चेति तद्गुणाः ।
एता अपि यथौचित्यादुत्तमाधममध्यमाः ॥” )

दूतीका, स्त्री, दूती । इति शब्दरत्नावली ॥

दूत्यं, क्ली, ( दूतस्य भावः कर्म्म वा । दूत + “दूतवणिग्भ्याञ्च ।” ५।१।१२६। इत्यस्येति वार्त्तिकोक्त्या यः । वैदिके तु “दूतस्य भागकर्म्मणी ।” ४ । ४ । १२० । इति यः । ) दूतकर्म्म । ( यथा, हरिवंशे । १०६ । ४१ ।
“वचनञ्च यथास्माभिर्दूत्ये नः क्षणविग्रहे ॥”
तथा च ऋग्वेदे । १ । १६१ । १ ।
“किमीयते दूत्यम् ॥”) दूतस्य भावः । इत्यमरः । २।८।१६ ॥ दूतस्वभावः । इति मेदिनी । ये,३२॥

दूनः, त्रि, ( ओ दू ङ य खेदे + क्तः । “ओदितश्च ।” ८ । २ । ४५ । इति निष्ठातस्य नः । यद्वा, दु गतौ + क्तः । “दुग्बोर्दीर्घश्च ।” इति वार्त्तिकोक्त्या तस्य नः दीर्घश्च । ) अध्वादिना श्रान्तः । इत्यमरः । ३ । १ । १०२ ॥ उपतप्तः । यथा, नैषधे । ३ । ६४ ।
“पित्तेन दूने रसने सितापि
तिक्तायते हंसकुलावतंस ! ॥”

दूरं, त्रि, ( दुर्दुःखेनेयते प्राप्यते इति । दुर् + इन् + “दुरीणो लोपश्च ।” उणां २ ।२० । रक् धातोर्लोपश्च । ) अनिकटम् । असन्निकृष्टम् । तत्पर्य्यायः । विप्रकृष्टम् २ । इत्यमरः । ३ । १ । ६८ ॥ अनासन्नम् ३ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । ४३ ।
“शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥”)
आके १ पराके २ पराचैः ३ आरे ४ परावतः ५ । इति पञ्च दूरनामानि । इति वेदनिघण्टौ ३ अध्यायः ॥

दूरदर्शनः, पुं, ( दूरेऽपि दर्शनं दृष्टिर्यस्य । ) गृध्रः । इति राजनिर्घण्टः ॥ ( दुर्लभे, त्रि । यथा, भागवते । १ । ११ । ८ ।
“अहो सनाथा भवता स्म यद्वयं
त्रैपिष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्व्वसौभगम् ॥”)

दूरदर्शी, [ न् ] पुं, ( दूरात् दूरमपि वा पश्यतीति । दृश + णिनिः । ) पण्डितः । इत्यमरः । २।७।६॥ गृध्रः । इति त्रिकाण्डशेषः ॥ दीर्घदर्शके, त्रि ॥

दूरदृक्, [श्] पुं, (दूरं दूराद्वा पश्यतीति । दृश् + क्विप् । ) पण्डितः । इति शब्दरत्नावली ॥ गृध्रः । इति हेमचन्द्रः । ४ । ४०१ ॥ दीर्घदर्शके, त्रि ॥

दूरमूलः, पुं, ( दूरे असन्निकटे मूलं यस्य । ) मुञ्जतृणम् । इति राजनिर्घण्टः ॥

दूरवेधी, [ न् ] त्रि, ( वेधोऽस्यस्येति । इनिः । दूरात् वेधी ।) दूरात् लक्ष्यभेदकः । तत्पर्य्यायः । दूरापाती २ । इति हेमचन्द्रः । ३ । ४३७ ॥

दूरेरितेक्षणः, त्रि, ( दूरे ईरिते ईक्षणे यस्य । ) केकरः । इति शब्दमाला ॥

दूर्य्यं, क्ली, (दूरे परित्याज्यम् । दूर + यत् ।) विष्ठा । इति शब्दरत्नावली ॥ ( दूराय रोगदूरीकरणाय साधु इति यत् । ) शटी । इति राजनिर्घण्टः ॥

दूर्व्वा, स्त्री, (दुर्व्वति दुर्व्व्यते वा । दुर्व्व हिंसायाम् + अच् घञ् वा । “उपधायाञ्च ।” ८।२।७८ । इति दीर्घः ।) स्वनामख्यातघासः । तत्पर्य्यायः । शतपर्व्विका २ सहस्रवीर्य्या ३ भार्गवी ४ रुहा ५ अनन्ता ६ । इत्यमरः ।२।४।१५८॥ तिक्तपर्व्वा ७ दुर्म्मरा ८ । बहुवीर्य्या ९ हरिता १० हरिताली ११ कच्छरुहा १२ ॥ शुक्लायाः पर्य्यायः । शतवीर्य्या १ गण्डाली २ शकुलाक्षकः ३ गोलोमी ४ । इति जटाधरः ॥ शतपर्व्वा ५ सितदूर्व्वा ६ सिता ७ । इति रत्नमाला ॥ नन्दा ८ महावरा ९ । इति शब्दरत्नावली ॥ ( यथा, महाभारते । ३ । ११० । १७ ।